# B.A. 3rd Semester (Programme) Examination, 2019-20

## SANSKRIT

**Course ID : 30919** **Course Code : ACP/303C/MIL-2**

Course Title: MIL-2

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** निम्नलिखितप्रश्नेषु *पञ्च*प्रश्नानाम् उत्तरं प्रदेयम्। 2×5=10

(a) पञ्चतन्त्रं केन विरचितम्? पञ्चतन्त्रं कीदृशं साहित्यम्?

(b) ब्राह्मणपुत्राः किमर्थं देशान्तरं गन्तुमिष्टवन्तः?

(c) पञ्चतन्त्रस्य कति अनुवादाः समुपलभ्यन्ते? पञ्चतन्त्रमित्यत्र तन्त्रपदेन किमुच्यते?

(d) विष्णुशर्मणा कथं पञ्चतन्त्र-ग्रन्थः रचितः?

(e) पञ्चानां तन्त्राणां नामानि कानि?

(f) "तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि"–कः कदा उक्तवान्?

(g) गङ्गादत्तः कः? स कस्मिन् स्थाने प्रतिवसति स्म?

(h) वानरमकरकथा कस्मिन् तन्त्रे अस्ति? तस्य तन्त्रस्य नाम किम्?

**2.** अधोनिर्दिष्टेषु यथानिर्देशं *चत्वारः* प्रश्नाः समाधेयाः। 5×4=20

(a) अधोलिखितेषु *पञ्चानां* सन्धिः कार्यः। 5

(i) अव + एहि (ii) नदी + अम्बु (iii) अति + आचार (iv) देवः + अत्र (v) मृत् + मयः (vi) वृक्ष + छाया (vii) शीत + ऋतः

(b) अधोलिखितेषु *पञ्चानां* सन्धिविच्छेदः कार्यः। 5

(i) भास्करः (ii) पतञ्जलिः (iii) आविष्कारः (iv) अहरहः (v) दिगन्तः (vi) महद्धितम् (vii) प्रातरेव

(c) अधोलिखितेषु *पञ्चानां* विग्रहवाक्यम् उल्लिख्य समासः निरूपणीयः। 5

(i) पाणिपादम् (ii) हरिहरौ (iii) सिंहासनम् (iv) दुर्भिक्षम् (v) वीणापाणिः (vi) मातापितरौ (vii) त्रिलोकी

(d) अधोलिखितेषु *पञ्चानां* समासबद्धरूपं लिखित्वा समास: निरूपणीय:।

(i) युवति: जाया यस्य स:।

(ii) दिवसे दिवसे।

(iii) रूपस्य योग्यम्।

(iv) शक्तिम् अनतिक्रम्य।

(v) कुम्भं करोति य: स:।

(vi) राजा चासौ ऋषिश्च

(vii) राज्ञ: पुरुष:।

(e) वरं बुद्धिर्न सा विद्या विद्यास्य बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारका:।।– व्याख्यायताम्।

(f) यस्य न जायते शीलं न कुलं न च संश्रय:।
न तेन सङ्गतिं कुर्य्यादित्युवाच बृहस्पति:।।– व्याख्यायताम्।

(g) योऽमित्रं कुरुते मित्रं वीर्य्याभ्याधिकमात्मन:।
स करोति न सन्देह: स्वयं हि विषभक्षणम्।।– व्याख्यायताम्।

**3.** अधोनिर्दिष्टेषु *एक:* प्रश्न: समाधेय: 10×1=10

(a) कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्रा: परस्परं मित्रतां गता वसन्ति स्म। ते चापि दारिद्र्योपहता: परस्परं मन्त्रं चक्रु:। ''अहो धिगियं दरिद्रता। तद्गच्छाम: कुत्रचिदर्थाय'' इति संमन्त्र्य स्वदेशं पुरं च स्वसुहृत्सहितं बान्धवयुतं गृहं च परित्यज्य प्रस्थिता:। एंव क्रमेण गच्छन्तोऽवन्तीं प्राप्ता:। तत्र सिप्राजले कृतस्नाता महाकालं प्रणम्य यावन्निर्गच्छन्ति, तावद् भैरवानन्दो नाम योगी सम्मुखो बभूव। ततस्तं ब्राह्मणोचितविधिना सम्भाव्य तैरभिहितम् अद्भुतशक्तिर्भवान् श्रूयते। तत् कथ्यताम् अस्माकं कश्चिद्धनलाभोपाय:'' इति।

(i) ब्राह्मणपुत्रा: कुत्र कथं प्रतिवसन्ति स्म? 2×5=10

(ii) दारिद्र्योपहतेन ब्राह्मणचतुष्टयेन किं मन्त्रितम्?

(iii) भैरवानन्द: क: आसीत्?

(iv) कदा ब्राह्मणपुत्रा: भैरवानन्दं दृष्टवन्त:?

(v) ब्राह्मणपुत्रा: भैरवानन्दं किम् उक्तवन्त:?

(b) अनुच्छेदं पठित्वा निम्नप्रदत्ता: प्रश्ना: समाधेया:।

अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बुपादप: सदाफल:, तत्र च रक्तमुखो नाम वानर: प्रतिवसति स्म। तत्रच तस्य तरोरध: कदाचित् कशलमुखो नाम मकर: समुद्रसलिलान्निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते निविष्ट:। ततश्च रक्तमुखेन स प्रोक्त: भो:। भवान् अभ्यागतोऽतिथि:। तद् भक्षयतु मया दत्तानि अमृतकल्पानि जम्बुफलानि। एवमुक्त्वा। तस्मै जम्बुफलानि प्रपच्छति। सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनमगमत्।

(i) वानरः कुत्र प्रतिवसति स्म? 2×5=10

(ii) किमासीत् मकरस्य नाम?

(iii) स कुतो निष्क्रम्य कस्मिन् स्थाने निविष्टः?

(iv) केन प्रकारेण गोष्ठीसुखम् अनुभूतं करालमुखेन?

(v) जम्बुपादपः कुत्र कीदृशश्च आसीत्?

(c) अनुच्छेदं पठित्वा निम्नप्रदत्ताः प्रश्नाः समाधेयाः।

अस्ति दाक्षिणात्ये पाटलिपुत्रं नाम नगरम्। तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्म। अस्य विधिवशाद्धनक्षयः सञ्जातः। ततो विभवक्षयादपमानपरम्परया परं विषण्णः स चिन्तितवान् – ''अहो धिक् इयम् दरिद्रता। अतः निर्द्धनोऽहमनशनम् कृत्वा प्राणान् उत्सृजामि।'' एंव निश्चयं कृत्वा सुप्तस्य तस्य स्वप्ने पद्मनिधिः क्षपणकरूपी दर्शनं दत्त्वा प्रोवाच– भोः श्रेष्ठिन् मा त्वं वैराग्यं गच्छ।

(i) पाटलिपुत्रनगरं कुत्र आसीत्? 2×5=10

(ii) तत्र कः प्रतिवसति स्म?

(iii) कथं मणिभद्रः दुःखित जातः?

(iv) पद्मनिधिः केन रूपेण वणिजः स्वप्ने आयातः?

(v) श्रेष्ठी किं चिन्तितवान्?

---